# Shrimad Abhinava Vidyatirtha Mahasvaminam Ashtottarashata Namavalih

# श्रीमदभिनव-विद्यातीर्थ-महास्वामिनां अष्टोत्तर-शतनामावलिः

## Document Information

Text title : Abhinava Vidyatirtha Mahasvaminam Ashtottarashata Namavalih

File name : abhinavavidyAtIrthamahAsvAminAmaShTottarashatanAmAvalI.itx

Category : deities_misc, gurudev, aShTottarashatanAmAvalI, nAmAvalI

Location : doc_deities_misc

Acknowledge-Permission: Sringeri Math https://www.sringeri.net/

Latest update : May 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 13, 2025

*sanskritdocuments.org*

# श्रीमदभिनव-विद्यातीर्थ-महास्वामिनां अष्टोत्तर-शतनामावलिः

विवेकिनं महाप्रज्ञं धैर्यौदार्यक्षमानिधिम् ।
सदाभिनवपूर्वं तं विद्यातीर्थगुरुं भजे ॥

अथ नामावलिः -
अद्वैतविद्यारसिकाय नमः ।
अनुकम्पासरित्पतये नमः ।
अतिमानुषचारित्राय नमः ।
अमृतोपमभाषणाय नमः ।
अनेकमठनिर्मात्रे नमः ।
अनेकदर्शनमर्मविदे नमः ।
अन्नपूर्णाप्रतिष्ठात्रे नमः ।
सन्नुतेशपदाम्बुजाय नमः ।
अहन्ताममताहीनाय नमः ।
अगजापतिभक्तिमते नमः । १०
आगमार्थपरिज्ञात्रे नमः ।
आश्रिताखिलरक्षकाय नमः ।
आशापाशसमुच्छेत्रे नमः ।
आपन्नार्तिविनाशकाय नमः ।
ईहाविरहितस्वान्ताय नमः ।
इभवक्त्रसुपूजकाय नमः ।
इन्दुमौलिपदध्यायिने नमः ।
इहाऽमुत्रार्थनिःस्पृहाय नमः ।
कर्माऽकर्मविभागज्ञाय नमः ।

कीर्तनीयगुणोज्ज्वलाय नमः । २०
कामिताशेषफलदाय नमः ।
कोमलस्वान्तसंयुताय नमः
कालट्यादिपरिष्कर्त्रे नमः ।
कामक्रोधविवर्जिताय नमः ।
कराब्जविलसद्दण्डाय नमः ।
काषायाम्बरसंवृताय नमः ।
गुरुपादाम्बुजध्यायिने नमः ।
गणनीयगुणोज्ज्वलाय नमः ।
चित्तनैर्मल्यसन्दायिने नमः ।
चिन्तालेशविवर्जिताय नमः । ३०
तीर्थराजकृतस्नानाय नमः ।
तीर्थीकृतधरातलाय नमः ।
तुषाराचलसञ्चारिणे नमः ।
तुङ्गास्नानसमुत्सुकाय नमः ।
दक्षिणास्यपदध्यायिने नमः ।
दक्षिणाम्नायपीठपाय नमः ।
दाक्षिण्यनिलयस्वान्ताय नमः ।
दान्त्यादिपरिशोभिताय नमः ।
धर्माऽधर्मविभागज्ञाय नमः ।
ध्याननिर्धूतकल्मषाय नमः । ४०
धर्मप्रचारनिरताय नमः ।
धिक्कृताखिलदुर्मताय नमः ।
नतलोकसमुद्धर्त्रे नमः ।
नियमाचरणोत्सुकाय नमः ।
न्यायमार्गानुसारिणे नमः ।
न्यायादिनयकोविदाय नमः ।
निगमागमतत्त्वज्ञाय नमः ।
नित्यसन्तुष्टमानसाय नमः ।
निष्कलङ्कसुचारित्राय नमः ।
नीतितत्वसुबोधकाय नमः । ५०
पारावारातिगम्भीराय नमः ।

प्राणायामपरायणाय नमः ।
पुर्यादिक्षेत्रयात्राकृते नमः ।
पुराणागमतत्वविदे नमः ।
पालिताशेषभक्तौघाय नमः ।
पिङ्गलाब्दसमुद्भवाय नमः ।
बहुशिष्यसमायुक्ताय नमः ।
बहुभाषाविशारदाय नमः ।
ब्रह्मतत्त्वानुसन्धात्रे नमः ।
ब्रह्मविद्योपदेशकाय नमः । ६०
भक्तहार्दतमोभेत्त्रे नमः ।
भिक्षुकोत्तमरूपधृते नमः ।
भेदवादीभपञ्चास्याय नमः ।
भुक्तिमुक्तिप्रदायकाय नमः ।
भयशोकादिरहिताय नमः ।
भवभीतिनिवारणाय नमः ।
महावाक्यविवेकज्ञाय नमः ।
महामहिमसंयुताय नमः ।
महाप्रज्ञासमायुक्ताय नमः ।
मात्सर्यादिविवर्जिताय नमः । ७०
मधुरालापचतुराय नमः ।
मतिनिर्जितगीष्पतये नमः ।
मोदिताखिलभक्तालये नमः ।
मर्यादापरिपालकाय नमः ।
योगिवन्द्यपदाम्भोजाय नमः ।
योगमार्गविशारदाय नमः ।
राजाधिराजसम्पूज्याय नमः ।
रागद्वेषविवर्जिताय नमः ।
रुद्राक्षभूषितग्रीवाय नमः ।
रुद्राराधनतत्पराय नमः । ८०
वशीकृतेन्द्रियग्रामाय नमः ।
वाग्देवीसमुपासकाय नमः ।
विद्यारण्यसमप्रज्ञाय नमः ।

विद्याविनयशोभिताय नमः ।
वेदशास्त्रपरित्रात्रे नमः ।
वादिमत्तेभकेसरिणे नमः ।
विदिताखिलशास्त्रार्थाय नमः ।
वीतरागजनस्तुताय नमः ।
व्याख्यासिंहासनाधीशाय नमः ।
व्याससूत्रार्थतत्वविदे नमः । ९०
शारदापूजनासक्ताय नमः ।
शारदेन्दुसमद्युतये नमः ।
शास्त्रतात्पर्यसंवेदिने नमः ।
शारदापीठनायकाय नमः ।
शङ्कराचार्यसंसेविने नमः ।
शङ्काद्रिभिदुरोपमाय नमः ।
शमिताखिलसन्तापाय नमः ।
शमादिसुगुणालयाय नमः ।
श्रीविद्याजपनिष्णाताय नमः ।
श्रीचक्रार्चनतत्पराय नमः । १००
श्रीशेशभेदरहिताय नमः ।
श्रीनृसिंहपदार्चकाय नमः ।
सञ्चारपूतधरणये नमः ।
संसारार्णवनाविकाय नमः ।
सत्यादिधर्मनिरताय नमः ।
सर्वभूतदयापराय नमः ।
अज्ञानध्वान्तमार्तण्डाय नमः ।
विद्यातीर्थजगद्गुरवे नमः । १०८

॥ इति श्रीमदभिनव-विद्यातीर्थ-महास्वामिनां अष्टोत्तर-शतनामावलिः समाप्ता ॥

*Shrimad Abhinava Vidyatirtha Mahasvaminam Ashtottarashata Namavalih*

pdf was typeset on May 13, 2025

Please send corrections to *sanskrit@cheerful.com*